


# ३ नद्यः

भारत एक नदीप्रधान देश है। यहाँ अनेक नदियाँ हिमालयादि पर्वतों से प्रादुर्भूत होकर विभिन्न क्षेत्रों को उपकृत और अभिसिञ्चित करती हुई समुद्र में जाकर मिल जातीं हैं। अपने सांस्कृतिक महत्त्व के साथ-साथ नदियाँ भौतिक रूप में हमारे लिए अनेक प्रकार से उपयोगी हैं। ये नदियाँ खेतों की सिंचाई, पेयजल, विद्युत् उत्पादन आदि के माध्यम से हमारा उपकार करतीं हैं। अपने इन्हीं मातृवत् गुणों के कारण भारतीय परंपरा में नदियों को माता के समान पूज्य माना गया है।

India is a river-rich country. Numerous rivers originate from the Himalayas and other mountain ranges, flow through different regions, irrigate and benefit the land, and ultimately merge into the sea. Along with their cultural significance, rivers are also immensely useful to us in many practical ways. They support us by providing irrigation for agriculture, drinking water, and hydroelectric power. Because of these motherly qualities, rivers have traditionally been revered and worshipped as mothers in Indian culture.

अस्माकं भारतदेशः अतीव विशालः अस्ति। अत्र बहवः गिरयः सन्ति। तेषु केचन अत्युन्नताः। केचन नात्युन्नताः। ते गिरयः मेघकलापं धृत्वा वृष्टिं सम्पादयन्ति। तेन अनेकाः नद्यः प्रवहन्ति। अनेकासु नदीषु महानदी, गोदावरी, कावेरी, कृष्णा च पूर्वसमुद्रं प्रति प्रवहन्ति। इतराः साबरमती, ताप्ती, नर्मदा च पश्चिमसमुद्रं प्रति प्रवहन्ति। काश्चन यथा भागीरथी, कालिन्दी, गण्डकी, कौशिकी च हिमालयशिखरेभ्यः प्रभवन्ति। पुरा सरस्वती नदी अपि पश्चिमसमुद्राभिमुखम् एव प्रवहति स्म, परन्तु अद्य अस्याः चिह्नानि एव यत्र तत्र प्रवाहमार्गे प्राप्यन्ते। अन्यासां नदीनां मध्ये वितस्ता, झेलम, चन्द्रभागा, इरावती, विपाशा, शुतुद्रुः च हिमालयात् प्रभवन्त्यः पञ्चनदप्रान्ते वहन्ति। भारतस्य मध्यप्रान्ते चर्मण्वती वेत्रवती च नद्यौ प्रसिद्धे स्तः।

© NCERT not to be republished



पुराणकालात् आरभ्य सर्वे भारतीयाः नदीनां सम्मानं कुर्वन्ति। क्षेत्रेषु सलिलसेचनेन नद्यपि मातेव भवति। अत एव यानि क्षेत्राणि नदीजलेन प्लावितानि तानि नदीमातृकाणीति प्रसिद्धानि यानि च वृष्टिजलेन सिक्तानि तानि देवमातृकाणि इति।

वर्षाकाले वृष्टिपातेन नद्याः जलेन च कृषिक्षेत्राणि प्लावितानि भवन्ति। कृषकाः कृषिकार्यं कृत्वा अन्नोत्पादनं कुर्वन्ति। नदीषु विविधाः मत्स्याः निवसन्ति। येषु प्रदेशेषु अनावृष्टि-कारणेन जलाभावात् कृषिः न प्रारभ्यते तत्र शासनाधिकारिणः नद्याः जलं प्रतिरुध्य सेतुं बद्ध्वा महाजलाशयान् निर्माय जलसञ्चयं कुर्वन्ति। तेभ्यः जलाशयेभ्यः क्षेत्रेषु जलं वितरन्ति। साम्प्रतं महानगरे नद्याः जलमेव प्रतिगृहं सर्वकारेण सम्प्रेष्यते।

नद्यां बन्धं निर्माय तस्मात् विद्युतम् उत्पादयन्ति। एषा जलमूला विद्युत् 'हाइड्रो-इलेक्ट्रिकपावर' इति नाम्ना प्रसिद्धा। भोः पश्यत! नद्यः देशस्य कीदृशमुपकारं कुर्वन्ति। अत एव जनाः ताः पूजयन्ति। स्वगृहेषु अधुनाऽपि जनाः स्नानसमये सर्वासां नदीनां सान्निध्यं स्नानजले प्रार्थयन्ते।

**गङ्गे च यमुने चैव गोदावरि सरस्वति।**
**नर्मदे सिन्धुकावेरी जलेऽस्मिन् सन्निधिं कुरु॥**

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| अतीव | अत्यधिकम् | बहुत अधिक | Very / Extremely | |
| गिरयः | पर्वताः | अनेक पहाड़ | Mountains | |
| केचन | केचित्/कतिपयाः | कुछ | Some | |
| मेघकलापम् | मेघसमूहम् | बादलों के समूह को | Cluster of clouds / Mass of clouds | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| इतराः | अन्याः | दूसरी | Others | |
| सलिलसेचनेन | जलसेचनेन | जल के द्वारा सींचने से | By irrigation with water | |
| नदीमातृकाणि | नदीजलसिञ्चितानि | नदियाँ हैं माता जिनकी (वे क्षेत्र) | Lands nourished by rivers / River-fed regions | |
| देवमातृकाणि | वर्षाजलाश्रितानि | वर्षा पर आधारित (खेत) | Rain-fed lands / God-given rain | |
| अनावृष्टिकारणेन | वृष्टेः अभावेन | वर्षा न होने के कारण | Due to lack of rainfall | |
| साम्प्रतम् | अधुना/इदानीम् | इस समय | At present / Nowadays | |
| सम्प्रेष्यते | प्रेष्यते | भेजा जाता है | Is supplied | |
| धृत्वा | धारणं कृत्वा | धारण करके | Holding | |
| प्रवाहमार्गे | जलगमनमार्गे | बहाव के रास्ते में | On the flow path | |
| प्रतिगृहम् | प्रत्येकं गृहे | प्रत्येक घर में | To every house | |
| नाम्ना | नामकेन | नाम से | By the name of | |

© NCERT not to be republished

## अत्र इदम् अवधेयम्

"यल्लिङ्गं यद्वचनं या च विभक्तिः विशेष्यस्य।

तल्लिङ्गं तद्वचनं सा च विभक्तिः विशेषणस्य॥"

व्याख्या— विशेषण-विशेष्ययोः लिङ्गे, वचने, विभक्तौ च समानता भवति।

| उदाहरणम् | विशेषणम् | विशेष्यम् | लिङ्गम् | वचनम् | विभक्तिः |
|---|---|---|---|---|---|
| केचन अत्युन्नताः, केचन नात्युन्नताः (गिरयः) | अत्युन्नताः, नात्युन्नताः | गिरयः | पुंल्लिङ्गम् | बहुवचनम् | प्रथमा |
| अनेकाः नद्यः | अनेकाः | नद्यः | स्त्रीलिङ्गम् | बहुवचनम् | प्रथमा |
| अनेकासु नदीषु | अनेकासु | नदीषु | स्त्रीलिङ्गम् | बहुवचनम् | सप्तमी |
| अन्यासां नदीनाम् | अन्यासाम् | नदीनाम् | स्त्रीलिङ्गम् | बहुवचनम् | षष्ठी |
| नद्यौ प्रसिद्धे | प्रसिद्धे | नद्यौ | स्त्रीलिङ्गम् | द्विवचनम् | प्रथमा |
| यानि क्षेत्राणि नदीजलेन प्लावितानि, तानि नदीमातृकाणि | प्लावितानि, नदीमातृकाणि | क्षेत्राणि | नपुंसकलिङ्गम् | बहुवचनम् | प्रथमा |
| यानि क्षेत्राणि वृष्टिजलेन सिक्तानि, तानि देवमातृकाणि | सिक्तानि, देवमातृकाणि | क्षेत्राणि | नपुंसकलिङ्गम् | बहुवचनम् | प्रथमा |

© NCERT not to be republished

## वयम् अभ्यासं कुर्मः

**१. अधोलिखितानां वाक्यानां पुरतः "सत्यम्/असत्यम्" वा लिखत—**

क. गोदावरी नदी पश्चिमसमुद्रं प्रति वहति।
ख. नद्यः कृषिकार्याय जलं प्रयच्छन्ति।
ग. बन्धं निर्माय जलात् विद्युत् उत्पाद्यते।
घ. सरस्वती नदी अद्यापि स्वपूर्णप्रवाहेण प्रवहन्ती दृश्यते।
ङ. भारतवासिनः प्राचीनकालादेव नदीनां सम्मानं कुर्वन्ति।

**२. अधोलिखितानां प्रश्नानां पूर्णवाक्येन उत्तराणि लिखत—**

क. भारतस्य मध्यप्रान्ते के नद्यौ प्रसिद्धे स्तः?
ख. काः नद्यः पूर्वसमुद्रं प्रति प्रवहन्ति?
ग. हिमालय-शिखरेभ्यः काः नद्यः प्रभवन्ति?
घ. पञ्चनदप्रान्ते काः काः नद्यः प्रवहन्ति?
ङः केन कृषिक्षेत्राणि प्लावितानि भवन्ति?

**३. द्वयोः स्तम्भयोः मेलनं कुरुत —**

| स्तम्भः क | स्तम्भः ख |
|---|---|
| क. कृषिः | १. विद्युदुत्पादनम् |
| ख. बन्धः | २. जलसञ्चयः |
| ग. जलाशयः | ३. सेचनम् |
| घ. नदी | ४. मत्स्यानां निवासः |
| ङ. जलविद्युत् | ५. जलमूला विद्युत् (हाइड्रो-इलेक्ट्रिक पावर) |

© NCERT not to be republished

## क्रियाकलापः

१. **अधोलिखितस्य श्लोकस्य सस्वरम् अभ्यासं कुरुत प्रतिदिनं स्नानकाले उच्चारयत च।**

गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धुकावेरी जलेऽस्मिन् सन्निधिं कुरु॥

२. **पाठे वर्णितानां नदीनां स्थानानि भारतस्य भौगोलिके मानचित्रे, चिह्नितानि कुरुत।**

© NCERT not to be republished